# असामान्या खलु मम माता



डॉ. जयन्त नारळीकर, पुणे

## किञ्चित्प्राक्कथनम् -

(कतिपयमासेभ्यः पूर्वं मया विज्ञापितेन डॉ. जयन्त नारळीकर-महोदयेन मह्यं तन्मातृचरणैर्लिखितं सुमतिदर्शनं नाम संस्कृतलेखात्मकं पुस्तकं प्रेषितम्। यावदहं तदपठिषं तावदेव मया अवधारितं यन्मातृचरणानां जन्मवर्षं १९१२ इति विद्यते। तस्मादेषमस्तने वर्षे तासां जन्मशताब्दीपर्व वर्तते। अनुपदमेव मया, ‌‌ॠभवान् मातृविषयमधिकृत्य किमपि स्मृतिजातं लेखनिविष्टं करोतु‌ॡ इति डॉ. नारळीकर-महाभागो विज्ञप्तः। सत्यपि कार्यबाहुल्ये महोदयेन सरलमनोरमशैलीमाश्रित्य अयं लेखो विसृष्टः। तेन वयमनुगृहीताः स्मः। - प्रसंपादकः)

***

'मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः।'

इत्युवाच अयोध्यानरेशः रामचन्द्रः स्वबालदिनानि संस्मरन्। अपि तु उत्तररामचरिते महाकविभवभूतेः वाक्यमिदं जनसामान्यानाम् अनुभवं पुष्टीकरोति। न मे बालकालोऽपवादः। तथापि मम जननी, सुमति-विष्णु-नारळीकरः, आसीदेका असामान्या महिला। परिचयलेखोऽयं तस्याः जन्मशताब्दीवर्षे स्मरणरूपेण आदरपुष्पाणि अर्पयितुं प्रयतते। कनिष्ठबन्धुभिः 'ताई' शब्देन संबोधिता सा विवाहोत्तरं पत्या पुत्राभ्यां च तेनैव नामधेयेन परिज्ञाता।

***

मम जीवनस्यादिकालस्य पूर्वस्मृतिर्यत्, वयसः चतुर्थे वर्षे प्रातःकाले सपदि विगतनिद्रोऽहं ताईगानेन संत-तुकारामस्य अभंगानाम्। मम कनिष्ठः बंधुः अनंतोऽपि मामनुसरन्नुत्तिष्ठन् तल्पम् अत्यजत्। जागरितस्य प्रायः तस्य प्रथमः प्रश्नः आसीत् : 'झाला?' मराठी भाषाभाषितः प्रश्नोऽयं 'चहा झाला?' (अपि चहापेयं सिद्धम्?) इत्यर्थकः आसीत्। सुज्ञः स्वल्पमात्रेण पूर्णार्थं जानाति। ताई नात्रापवादभूता। किं बहुना, आवाभ्यां स्वल्पशब्दैः सूचितां कामनां स्वानुभवात् ज्ञात्वा तस्याः पूर्तये सा लग्ना आसीत्।

ताई पुत्रवत्सला आसीत् तथैव भर्तृवत्सलाऽपि। आषाढस्य प्रथमदिवसे मेघाश्लिष्टनभो दृष्ट्वा आवयोः तातः यदि ब्रूते सम्यक् कालोऽयं चहापानाय

भजीभक्षणाय च तर्हि, ताई सत्वरं चहा + भजी = भर्तुरीप्सितम् इति समीकरणस्य पूर्तिम् अकरोत्।

***

हुजुरबाजारकुले जाता ताई करवीरनगर्यां राजाराममहाविद्यालये छात्रा आसीत्। संस्कृतभाषायां एम्.ए. पदवीम् अवाप्य सा गृहिणीपदे प्रविष्टा। विवाहोत्तरं सा दक्षिणकाश्याः स्थलान्तरं कृत्वा उत्तरकाशीं गता। काशी–हिंदू–विश्वविद्यालये मम तातः गणितप्राध्यापकः विभागप्रमुखश्चासीत्। अभ्यासेन गणितज्ञोऽसौ छन्दसा संस्कृतज्ञोऽपि आसीत्। अतः विश्वविद्यालयस्य संस्कृतपण्डिताः काव्यशास्त्रविनोदाय तस्य गृहे आगच्छन्। तेषां चर्चायां ताई अपि यावच्छक्यं सहभागमकरोत्। तस्याः प्रज्ञां तथा भाषानैपुण्यं दृष्ट्वा संस्कृतप्राध्यापक–बेलवलकरमहाभागः मम पितरं प्रास्तावीत् यद् तस्यानुज्ञया असौ ताई पीएच्.डी. उपाधिम् उपलक्ष्य संशोधनार्थं मार्गदर्शनं कर्तुम् इच्छति इति। मम जनकस्तु प्रस्तावम् न स्वीकृतवान्। 'किमर्थम्?' असौ अवदत् यद् 'विवाहितानां महिलानां गृहिणीधर्मः परमो धर्मः। अतः भर्तुः परिवारधारणे पुत्रयोश्च संगोपने लग्ना सा संशोधनकार्यार्थं समुचितं कालं प्रयासं च आहर्तुम् असमर्था!' भर्तुः निर्णयः तया स्वीकृतः। स्त्रीपुरुषसमानाधिकारप्रधाने वर्तमानकाले सः निर्णयः कठोरः अयोग्यश्च भाति।

अनेन निर्णयेन संशोधनमार्गे बाधितापि ताई संस्कृतभाषाप्रेम नात्यजत्। परन्तु पत्युराज्ञां पालयन्ती सा गृहस्थाश्रमे स्वं चातुर्यं कलां च आनीतवती। गृहकार्ये दक्षा ताई बनारसनगरस्य तीव्रग्रीष्मस्य तीव्रशिशिरस्य च पीडनम् अल्पीकर्तुं बहून् उपायान् योजितवती। डिसेंबरजानेवारीमासद्वये उष्णजले स्नानं कृत्वा अतिशीतलानि वस्त्राणि परिधातुं वयं पीडाम् अन्वभवाम। तस्योपरि अयम् उपायः शोधितः। तया एका अंगारधानिका स्नानगृहे प्रस्थापिता। तस्या उपरि निहितानि वस्त्राणि उष्णत्वात् परिधातुं सरलानि। निदाघे आगते सति शीतजलस्य अभावः उपजायते। रेफ्रिजरेटरः (शैत्यकरयन्त्रम्) अधुना सर्वत्र वर्तते। मम बाल्यकाले दुर्लभा आसीत् तस्य सुविधा। कुतः प्राप्तव्यम् शीतजलम्? प्रश्नस्यास्य उत्तरम् अन्विष्टं मम मात्रा। यदि जलाभिषिक्तेन वस्त्रेण जलपात्रम् अवगुंठितं स्यात् तर्हि जलस्य बाष्पीभवनात् पात्रं च तस्मिन् स्थितं जलं च शीतत्वं याति। इति बाष्पीभवन–सिद्धान्तस्य प्रात्यक्षिकं तया उपयोजितम्।

अन्ये च बहवः उपायाः तया जीवनं सुकरं कर्तुम् अनुष्ठिताः। शिशिरर्तौ

आवयो: (मम ममानुजस्यच) उत्तरीयं शॉल रूपेण अवगुंठितं स्कंधाभ्यां पदे पदे अस्खलत्। सेफ्टी पिने (क्षेमसूच्या) तदुत्तरीयं तथा स्थिरीकृतं येन तत् परिधाय आवां धावनम्, आरोहणम्, उत्पतनम् आदि सर्वामपि बालसदृशीं मर्कटचेष्टां कर्तुं समर्थौ नि:शंकम्। 'भवत्या अस्या: पद्धते: पेटंटम् (स्वामित्वाधिकारपत्रम्) अवाप्तव्यम्' इति उवाच अतिथि: साहित्यशिरोमणि: मा.दा. अळतेकरमहोदय:।

***

परंतु लालनम् अतिक्रम्य पुत्रद्वयं सरस्वतीभक्तं कर्तुं सदैव प्रयत्नशीला आसीत् मम माता। शैशवकाले रात्रौ निद्रापूर्वं विविधकथाभि: आवयो: मनोरंजनं कुर्वती सा क्रमश: स्वयमेव कथावाचने अस्मान् आकर्षत्। मम पिता ग्रंथानुरागी आसीत्, परंतु आवयो: ग्रंथानुराग: मात्रा प्रोत्साहित:। असंख्यपुस्तकानां वाचनेन आवयो: अनुभवविश्वं विस्तारितम्। आवां काव्यशास्त्रविनोदसेवनं स्वमात्रा प्रदर्शितमार्गेण अनुभवितुं क्षमौ आस्व।

तथा च आवयो: पाठशालाशिक्षा योग्यमार्गेण प्रवर्तते इति तया सततं निरूपितम्। वार्षिक्या: अर्धवार्षिक्या: वा, परीक्षाया: पूर्वं सा स्वरचितं प्रश्नपत्रम् उत्तराणि लेखितुं मह्यं ददाति स्म। प्रथमाया: कक्षाया: प्रारभ्य दशमीपर्यन्तं तस्या: मार्गदर्शनं मया लब्धम्।

'लालयेत् पंच वर्षाणि दश वर्षाणि ताडयेत्।' इति शंसति जनकानां प्रबोधनश्लोक:। ताई आवयो: लालनं नात्यज़त्। किन्तु ताडनेन विना आवाम् अनुशासनप्रियौ कर्तुं सा सततं प्रयत्नशीला आसीत्।)

***

यावदहं बनारसे (वाराणस्यां) विद्यार्जनमकरवं तावत् ताई प्राधान्येन मम मार्गदर्शनार्थम् अयतत। मयि अनंते च उच्च विद्यार्जनार्थम् आंग्लदेशे गतयो: सा स्वान्त:सुखाय संस्कृतसेवां कर्तुं लेखनेन भाषणेन च प्रवृत्ता। तस्या: संस्कृत-भाषणानि सरल-सहज-शब्दै: अलंकृतानि दैनंदिन-विषयचर्चापूर्णानि आसन्। अस्माकं सन्मित्रम् काशीहिंदूविश्वविद्यालये संस्कृतविभागे सुशोभित: विद्वान् पंडित: रेवाप्रसादो द्विवेदी ताईदत्तानि भाषणानि पुस्तकरूपेण सुमतिदर्शनम् इति शीर्षकेण प्रकाशितवान्। अधुना ताईजन्मशताब्दीवर्षे नियतकालिकेऽस्मिन् तस्या: भाषणानां क्रमश: प्रकाशनं प्रारब्धमिति मम समाधानाय मोदाय च खलु!

***